# શ્રી રાહુ કવચં

અસ્ય શ્રી રાહુ કવચ સ્તોત્રમન્ત્રસ્ય ચન્દ્રમા ઋષિઃ
અનુષ્ટુપ્ ચન્દઃ રં બીજં નમઃ શક્તિઃ
સ્વાહા કીલકં રાહુ પ્રીત્યર્ત્થં જપે વિનિયોગઃ

પ્રણમામિ સદા રાહું શૂર્પાકારં કીરીટિનીં
સૈન્હિકેયં કરાલાસ્યં લોકાનામભયપ્રદં 1

નીલાંબરઃ શિરઃ પાતુ લલાટં લોકવન્દિતઃ
ચક્ષુષી પાતુ મે રાહુઃ શ્રોત્રે ત્વર્દ્ધશરીરવાન 2

નાસિકાં મે ધૂમ્રવર્ણઃ શૂલપાણિર્મુખં મમ
જિહ્વાં મે સિંહિકા સૂનુઃ કણ્ઠં મે કઠિનાંઘ્રિકઃ 3

ભુજંગેશો ભુજૌ પાતુ નીલમાલ્યાંબરઃ કરૌ
પાતુ વક્ષઃસ્થલં મન્ત્રી પાતુ કુક્ષિં વિધુંતુદઃ 4

કટિં મે વિકટઃ પાતુ ઊરૂ મે સુરપૂજિતઃ
સ્વર્ભાનુર્જાનુની પાતુ જંઘે મે પાતુ જાડ્યઃ 5

ગુલ્ફૌ ગ્રહપતિઃ પાતુ પાદૌ મે ભીષણાકૃતિઃ
સર્વાણ્યંગાનિ મે પાતુ નીલચન્દનભૂષણઃ 6

રાહોરિદં કવચમૃદ્ધિદવસ્તુદં યો ભક્તા પઠત્યનુદિનં નિયતઃ શુચિ સન
પ્રાપ્નોતિ કીર્ત્તિમતુલાં શ્રિયમૃદ્ધિં
આયુરારોગ્યમાત્મવિજયં ચ હિ તત્પ્રસાદાત્ 7

ઈતિ શ્રી માહાભારતે ધૃતરાષ્ટ્રસઞ્જય સંવાદે દ્રોણપર્વણિ  રાહુ કવચં
સંપૂર્ણણં !